CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
S.D.P.B.
Coll. No. 146

Title 'SANTIVIDHI.

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 146 Subject: Dharmaśāstra

Title: 'Śāntividhi'.

Author: — Scribe: —

Date of the work: — Date of the Ms.: —

Place of the work: — Place of the Ms.: —

Size: 9.7" × 5.24 Extent: Fol. 35. Fol. 2 to ? are missing

Language: Sanskrit. Script: Devanāgarī.

Remarks: incomplete. Fol. 1 to 2 to ? missing

॥ श्रीगणेशाय नमः ॥ ॥ अथ दर्शजननशांतिप्रयोगः ॥ ॥ कर्तास्य
कुमारस्य कुमार्या वा दर्शजन्मसूचितानिष्टनिवृत्यर्थं शांतिं करि
ष्ये ॥ इति संकल्प्य ॥ गणेशपूजास्वस्तिवाचनाचार्यादिवरणानि
कुर्यात् ॥ अथाचार्यः सर्षपविकिरणोल्मुकादि कृत्वा ॥ शुद्धभूमौ स
न्नपूर्णं पंचगव्यपल्लवत्वक्रत्नयुक्तं वासोयुग्मवेष्टितं कुंभं धान्यो
परि संस्थाप्य ॥ सर्वे समुद्रा इति तीर्थान्यावाह्यापो हिष्ठेति तृचेन क
यानश्चित्र इत्यृचा यत्किंचेदमित्यृचा समुद्रज्येष्ठा इति त्र

संस्कृते पुण्यदेशे तु मंडपं कारयेद्बुधः ॥ पुण्याग्निर्मंत्रितैस्तोयैः प्रोक्षितायां
क्षितौ नूतनः ॥ तत्रोदकुंभं सुशुभ्रं द्रुणं रक्तं व्रणविवर्जितं ॥ सुवर्तुलं च निर्मि
तं पूरयेन्निर्मलांभसा ॥ वस्त्रावगुंठितं कुर्यात्पूरयेत्तीर्थवारिणा ॥ कूर्च
हेमसमायुक्तं नूतनपल्लवसंयुतं ॥ स्वस्तिकोपरि विन्यस्य सक्षीरद्रुमपल्ल
वैः ॥ शोणवस्त्री ॥ हैमीं च निक्षिप्य ईशाने च निधापयेत् ॥ पंचरत्नानि निक्षिप्य
सर्वौषधिसमन्वितं ॥ अर्चितं पुष्पगंधाद्यैः श्रीरुद्रं च प्रयज्जपेत् ॥ षडं
गसहितं सम्यक्कुंभपार्श्वे रुद्रसंख्यया ॥ बह्वृचा रुद्रसूक्तैर्वा छंदोगा रुद्र

सामाग्निः॥ रुद्रसूक्तानि सामानि च त्रीण्येव ॥ कपिंजलन्यायात् ॥ एकादशाष्ट
त्रिंश्चैकसंख्यया शक्तितो जपेत् ॥ तत्राप्रतिरथं सूक्तं शतरुद्रानुवाककं ॥
रुद्रानुवाकं तथा पुण्यं शाङ्खोग्रं च सूक्तान् जपेत् ॥ त्र्यंबकं जपेत्सम्य
गष्टोत्तरसहस्रकं ॥ एकवारं तथा वापि पावमानी सूक्तान् जपेत् ॥ जप
स्य पंचकर्माः स्युर्द्वयं वा तदज्ञानतः ॥ श्रीरुद्रस्यैककर्मनस्थेष्वसर्वस्व
क्तानि तत्र तु ॥ तथान्यं च तु तत्कर्म पूर्वोक्तैर्लक्षणैर्युतं ॥ चतुःप्रस्रव
णं कुर्यात् पंचवक्त्रं तु तद्भवेत् ॥ अत्रायं सांप्रदायिकार्थः ॥ आद्यपक्षे

षट्कर्माः ॥ एको रुद्रस्य तस्मिन् शतरुद्रियं रुद्रसूक्तानि सामानि वा
जप्यानि ॥ अभिषेकार्थं पंचकर्माः ॥ तत्र पूर्वादिकर्म चतुष्टये तत्राप्र
तिरथमित्यादिना क्रमात्सूक्तचतुष्टयविधिः ॥ मध्ये च त्र्यंबकमंत्रपावमा
नीजपविधिः ॥ एवं पंचकर्माशक्तौ चतुःप्रस्रवणं एकमेव ॥ द्वयमिति द्वि
त्वं तु रुद्रकर्ममादाय ॥ अत एव श्रीरुद्रस्येति श्लोकार्द्धेन रुद्रकर्म एव
पूर्वोक्तोऽपि द्वित्वसंख्यापूरणाय गृह्यते ॥ चतुःप्रस्रवणमेव तु पंचकर्मस्था
ने विधीयते ॥ एवं पंचवक्त्रं तु तद्भवेदिति पंचवक्त्रोक्तिरपि पंचकर्मस्था

नापत्यासंगच्छते ॥ वस्त्रावगुंठितं कुर्यात्स्थापयेत्तीर्थवारिणा ॥ पंचरत्नसमा
युक्तमाम्रपल्लवसंयुतं ॥ गजाश्वरथ्यावल्मीकात्संगमाद्ध्रदगोकुलात् ॥
राजद्वारप्रदेशाच्च मृदमानीय निक्षिपेत् ॥ कुंभस्य नैर्ऋतदेशे होमदेशं
प्रकल्पयेत् ॥ गोमयालेपिते देशे कुर्यात्स्थंडिलमुत्तमं ॥ कृत्वाग्निमुख
पर्यंतं मुख्यैरवादि स्वशक्तितः ॥ पूर्णपात्रनिधानांतं कृत्वा पूजां समा
चरेत् ॥ नक्षत्रदेवतारूपं सुवर्णेन प्रयत्नतः ॥ निष्कमात्रेण वार्द्धेन
पादेनाथ स्वशक्तितः ॥ प्रतिमां लक्षणोपेतां कारयित्वा विचक्षणः ॥

यक्षामूले सुवर्णस्य स्थापयित्वा प्रपूजयेत् ॥ मूलं मूलाकारं शून्यमिति
क्वचित्पाठः ॥ न दाप्रतिमाशून्यमित्यर्थः ॥ सुवर्णं सर्वदैवत्यं सर्वदेवा
त्मको नलः ॥ सर्वदेवात्मको विप्रः सर्वदेवमयो हरिः ॥ संस्मरेन्निर्ऋतिं श्या
मं सुमुखं नरवाहनं ॥ रक्षोधिपं खड्गहस्तं दिव्याभरणभूषितं ॥ प्रति
मां पूजनार्थाय वस्त्रयुग्मं प्रकल्पयेत् ॥ पंकजं कारयेद्भूमौ रक्तान्नैर्व्री
हितंडुलैः ॥ चतुर्विंशद्दलोपेतं श्वेतैर्वा कर्णिकान्वितं ॥ तस्योपरिन्य
सेत्पात्रं स्वर्णं वा रौप्यमृन्मयं ॥ शुक्लवस्त्रेण संछाद्य तत्र मूलानि नि

क्षिपेत्॥मूलानिशतमूलानितानिचत्वयमुत्पादयेत्प्रारोमूलानीचश
तांपिना॥मंगल्याश्चपवित्रश्चत्वबध्यःकथयाम्यहं॥लक्ष्मणाशतमूलीं
चशिरीषोवेतसस्तथा॥सहकाश्वेतमूलाचविष्णुक्रांताचशंखिनी॥
सर्पाक्षीमीननेत्राचपुत्रंजीवीरुदंतांजली॥पालाशोबिल्वकश्चैवरो
चनाचंदनद्वयं॥लक्ष्ममांसीमुरोशीरंबालकंचतथामला॥गोजि
ह्वातुलसीईश्वरीशतपुष्पीसलांगली॥ब्रह्मदंडीद्रोणपुष्पीप्रियंगुः
सितसर्षपा॥पिप्पलीकाकजंघाचत्रायमाणाकुकस्तथा॥ज्योति

ष्मतीचगंधारीनिर्गंधाप्रुलर्कोशिका॥नगदमासुनंदाचयुद्धवीचें
ड्वारुणी॥अजंबुकारुदंतीचकदलीकेतकीतथा॥गोक्षुरंशतपर्वा
चअरिष्टिकापराजिता॥छिन्नरुक्षाशानंपर्वानिकुंभाचसुवर्चला॥
अश्वगंधाहस्तिकर्णीहरिद्राद्वितयंतथा॥उदुंबरोमधुकारश्चअश्व
त्थोवकुलस्तथा॥नष्टक्षीरावपामार्गोयामांदारुश्चातिमुक्तकः॥म
लनीपुष्पस्वर्णाधश्रीपर्णीश्रीफलंतथा॥दर्भमूलंकरवीरंमदयंती
विकंकतः॥पाटलासुरदारुश्चअर्कस्पंदनिकस्तथा॥फलंमन्मयम्

लस्यपलाशस्यचपल्लवाः॥रास्नानंदीवृक्षमूलंसुरदारुर्विदारिका॥श्वे
तवीयश्चितपाकानीलोत्पलंतथैवच॥नागकेसरमंदारीकुमारिंचैवं
निक्षिपेत्॥तीर्थांबुपंचगव्यंचसर्वौषध्यश्चकांचनं॥यथासंभवतोग्रा
ह्यंमूलमपिशातंशुभं॥वीरत्वाचासमेतंचशतछिद्रेघटेन्यसेत्॥शत
मूलाशतावरी॥चेतसोवंजुलः॥सहकारःसहदेवाश्वेतमूलापुनर्न
वा॥मीननेत्रामछाक्षीपुत्रपारीपुत्रजीवी॥लतांजलिनीहायाजो
डाशतिमसिद्धः॥बिल्वकोबिल्वकः॥चंदनद्वयंश्वेतसिद्धा॥ब्रह्मदं

डीश्वधःपुष्पीशोणपुष्पीकरंबुकः॥काकजंघाकाकांगीज्योतिष्मती
कंगुला॥गांधारीदेवगांधारीपूर्णकोशिकाकोशातकी॥नगदमाशि
यः॥सुनद्भासारिवा॥निंबिकाडुंगीविशाखपर्वविचा॥अरिष्टकानाग
बला॥छिन्नरुहापिंडगडूची॥शतपत्राकमलिनीनिकुंभादंतिभेदः॥
सुवर्चलाप्रयंनकाहस्तिकर्णएरंडः॥उष्ट्रवःपीलुः॥मधुकारोमधुकः॥
सर्जरावीजकः॥अतिमुक्तकोमाधवी॥मालतीजाती॥स्वर्णपुष्पाउन्म
शाली॥श्रीफलंबिल्वं॥मदयंतीयूथिका॥विकंकतःस्त्रुववृक्षः॥अर्द्धस

दनिकापाठेया।मन्मथस्त्वक्चापः।सुरदारुर्देवदारुः।विदारिका तु कूष्मा
ण्डी।श्वेतपाकारुंजा।शेषाणिस्पष्टानि।विष्णुक्रांतासहदेवी तुलसी तु
शतावरी॥मूलानिमानिशृंगीयाच्छतालान्नेविशेषतः।स्थापयेत्क
र्णिकामध्ये वस्त्रगंधाद्यलंकृतं॥कूर्चंहेमं जलोपेतं कुंकुमौषधिसं
युतं॥ॐनोपरिन्यसेद्विद्वान्मूलनक्षत्रदैवतं॥अधिप्रत्यधिदेवौ च द १२
क्षिणोत्तरदेशयोः॥अधिदैवं यजेदादौ ज्येष्ठानक्षत्रदैवतं॥उत्तरा
षाढक्षाद्दिक्षु अनुराधांतमर्चयेत्॥ऐंद्रादीशानपर्यंतं पूजयेत्स्व

स्वनामतः॥स्वलिंगोक्तैश्च मंत्रैश्च प्रधानादीन्प्रपूजयेत्॥पंचामृतेन सं
स्थाप्य आवाह्याथ समर्चयेत्॥उपचारैः षोडशभिर्यद्वा पंचोपचारकैः॥
रक्तचंदनगंधाद्यैः पुष्पैः कृष्णसितादिभिः॥मेषः शृंगादिधूपैश्च घृतदी
पैस्तथैव च॥सुरापोलिकमांसाद्यैर्नैवेद्यैरोदनादिभिः॥मत्स्यमांससु
रादीनि ब्राह्मणानां विवर्जयेत्॥सुरास्थाने प्रदातव्यं क्षीरं सैंधवमिश्रि
तं॥पायसं लवणोपेतं सुरास्थाने प्रकल्पयेत्॥उक्तगंधाद्यलाभे तु य
थालाभं समर्चयेत्॥पश्चात्तु समन्त्रं चरुहोमं कुर्याद्यथोदितं॥नि

वपिप्रोक्षणादीनि चरोः कुर्याद्यथाविधि ॥ हविर्गृहीत्वा विधिवन्नैर्ऋ
त्येवस्त्रचाकुनेत् ॥ अधिदेवतयोश्चापि जुहुयात्स्वस्वमंत्रतः ॥ चतु
र्थ्यंतैर्नामोतैश्च स्वाहांतैः स्वस्वमंत्रकैः ॥ नक्षत्रदेवताभ्यश्च पायसेन
तु होमयेत् ॥ कृणुष्वेति पंचदशभिर्जुहुयात्कृशरं ततः ॥ गायत्र्या जा
तवेदसे त्र्यंबकमिति क्रमात् ॥ सीरायुंजेति ताभ्यामग्निं वास्तोष्पत्यग्निमे २३
वच ॥ क्षेत्रस्यपतिना गणानामग्निंदूतं तथैव च ॥ श्रीसूक्तेन तथा वि
द्वान्समिदाज्यचरून्क्रमात् ॥ अष्टोत्तरशतं वापि अष्टाविंशतिभिः क्र

मात् ॥ अष्टाष्टसंख्यया वापि जुहुयाद्भक्तितो बुधः ॥ वैनः सोमेन पाय
सं जुहुयात्त्रयोदश ॥ चतुर्गृहीतमाज्यं च यानेरुद्रेति मंत्रतः ॥ स्रुवे
ण जुहुयादाज्यं महाव्याहृतिभिः क्रमात् ॥ कुर्यात्स्विष्टकृतं पश्चात्प्रा
यश्चित्ताहुतिर्हुनेत् ॥ आचार्यो यजमानो वा अग्नौ पूर्णाहुतिं हुनेत् ॥
सुमुखादिति सूक्तेन प्राजापत्यस्य चानया ॥ पूर्णादर्विसमंत्रैस्तैः पूर्णाहु
तिं हुनेत् ॥ होमशेषं समाप्याथ वह्निमारोपयेद्बुधः ॥ कुंभान्निमंत्रितान्कु
र्याद्दक्षिणेनाग्निमर्चयेत् ॥ स्तकप्रशमनार्थाय उपेत्र्यैर्यंबकं शतं ॥ रु

द्रसूक्तेनोक्तमार्गेणरुद्रसूक्तेनस्पृशञ्जपेत्॥धूपंदीपंचनैवेद्यंसूक्तेनयुग्मे
निवेदयेत्॥प्रासादयेत्ततोदेवमभिषेकार्थमादरात्॥तस्मिन्कालेय
द्वातिर्य्यंकेतूर्य्यंश्रुतिमिच्छता॥पृथक्कुम्भशतैस्तेनैवनद्भेतेष्ठ्यासहैवच॥
अभिषेकेविधिंवक्ष्येपूर्वाचार्यैरुदाहृतं॥तदासनोपविष्टस्ययज
मानस्यऋत्विजः॥दारपुत्रसमेतस्यकुर्युःसर्वेभिषिंचनं॥आद्रीन्या १४
मितिसूक्तेनपावमानीभिरेवच॥आपोहिष्ठेतितिसृभिर्यतइंद्रद्वयेन
च॥सहस्राक्षेणचेनापिदेवस्यत्वेतिमंत्रकैः॥शिवसंकल्पमंत्रेणवद्रा

माणेश्वमंत्रकैः॥योसौवज्रधरोदेवोमहेंद्रोगजवाहनः॥मूलजातशि
शोर्दोषंमातापित्रोर्व्यपोहतु॥योसौशक्तिधरोदेवोहुतभुङ्मेषवाहनः॥
सप्तजिह्वःसदेवोग्निर्मूलदोषंव्यपोहतु॥योसौदंडधरोदेवोधर्मोमहि
षवाहनः॥मूलजातशिशोर्दोषंव्यपोहतुयमस्तथा॥योसौखड्गधरो
देवोनिर्ऋतीराक्षसाधिपः॥प्रशामयतुमूलजोत्थंदोषंबालस्यशांतिदः॥
योसौपाशधरोदेवोवरुणश्चजलेश्वरः॥नक्रवाहःप्रचेताख्योमूलजोत्था
दोषंव्यपोहतु॥योसौदेवोजगत्प्राणोमारुतोमृगवाहनः॥प्रशामयतुमूलजो

न्तुदोषगंडांतसंभवं॥ योसौनिधिपतिर्देवोगदाहस्तनरवाहनः॥ मा
तापित्रोः शिशोश्चैवमूलदोषंव्यपोहतु॥ योसौपशुपतिर्देवःपिनाकी
वृषवाहनः॥ आश्लेषामूलगंडांतदोषमाशुव्यपोहतु॥ विघ्नेशःक्षे
त्रपोदेवःपिनाकीवृषवाहनः॥ आश्लेषामूलगंडांतदोषमाशुव्यपो
हतु॥ सर्वदोषप्रशमनंसर्वेकुर्वंतुशांतिदाः॥ नक्षत्रयोरनिषेकंतुस २५
र्वरोगप्रशांतिदं॥ सर्वकामप्रदंदिव्यंमंगलानांचमंगलं॥ वस्त्रांतरि
तकुंभान्यांपश्चात्तुस्नपयेद्बुधः॥ ततःशुक्लांबरधरःशुक्लमाल्यानु
हुर

लेपनः॥ यजमानोदक्षिणाभिःतोषयेदृत्विगादिकान्॥ धेनुंपयस्विनीं
दद्यादाचार्यायसवत्सकां॥ निष्कत्रिप्रतिमांवस्त्रंकुंहेमचदापयेत्॥ यद्धा
यथाशिवस्त्रंप्रतिमांतत्तज्ञोन्नस्वदापयेत्॥ यहहोत्रिषुदापयेदितिक्व
चित्पाठः॥ श्रीरुद्रजापिनोदेयः कृष्णोनडुान्प्रयत्नतः॥ नक्षत्रंनवस्त्रप्र
तिमांतस्मैदद्यात्प्रयत्नतः॥ इंद्रंतरेभ्योपिविप्रेभ्यःशक्त्यादद्याच्चदक्षि
णां॥ उक्तालाभेतनोदद्यादाचार्यब्रह्मऋत्विजां॥ तत्तन्मूल्यंप्रदातव्यं
शक्त्यावाथप्रदापयेत्॥ आचार्यायचप्रदानंयद्दत्तंतदर्द्धंब्राह्मणेनवेत्॥

सदस्यायब्रह्मणोऽर्ध्यंऋत्विग्भ्यश्चनदद्यात्।।गृह्णीयादाशिषस्तेभ्यःप्रण
म्यायक्षमापयेत्।।दद्यादन्नंपायसादिब्राह्मणान्भोजयेच्छतं।।अ
ज्ञानेसतिपंचाशद्दशाकंनदद्यावतः।।सर्वशांतेचपवनंब्राह्मणेराशि
षस्तथा।।इत्थंक्षमापयेद्विप्रान्निर्ऋतिःप्रीयतामिति।।विधानेचरिक्ते
स्मिंस्ततःशांतिर्भवेध्रुवं।।गंडांतेष्वेवमेवस्यात्पुष्पाद्येष्वेवमेवहि। २८
समाप्तेऽक्षादशाहेकुर्याद्वैशांतिमादरात्।। ।।अथमूलर्क्षश्लेषा
शांत्योःप्रयोगः।। ।।तत्रकर्तोक्तिकालेमासपक्षाद्युल्लिख्य।।ममास्य

शिशोःकुमार्यावामूलाद्यपादादिजन्मसूचितपित्राद्यनिष्टशांत्यर्थं
शांतिंकरिष्ये।इत्युक्त्वागणेशपूजनस्वस्तिवाचनमातृकापूजनान्यभ्यु
दयिकानिकृत्वा।।आचार्यब्रह्मसदस्यान्ऋत्विजश्चाष्टौषट्चत
रोवायथाविभवमर्चयेत्।।अथाचार्यः।आचार्यकर्मकरिष्यइत्युक्त्वा।।
यदत्रसंस्थितमितिसर्षपान्विकीर्यापोहिष्ठेत्यादिभिर्भुवंप्रोक्ष्यशा
न्तांमहीद्यौरितिस्पृष्ट्वौषधयःसमितिद्रोणपरिमितंव्रीह्यादिकृत्वा।।
कलशोऽस्मिन्निरुद्धकुंभंसंस्थाप्य।।इमंमेगंगेत्युदकेनापूर्य।।गंधद्वारामि

तिगंधं॥याओषधीरित्योषधीः॥ओषधयःसमितियवान्॥कांडादितिदूर्वा॥अश्व

त्थेवइतिपंचपल्लवान्॥रुद्रवर्तिनीमइतिपंचत्वचः॥स्योनापृथिवीतिसप्तमृ

दो॥याःफलिनीरिति॥फलं॥सहिरत्नानीतिपंचरत्नानि॥हिरण्यरूपइतिहिर

ण्यं॥गायत्र्यागोमूत्रं॥पुनर्मामितिगोमयं॥आप्यायस्वेतिपयः॥दधिक्राव्ण्ण

इतिदधि॥तेजोसीत्याज्यं॥देवस्यत्वेतिकुशोदकं॥मधुवातेतिमधु॥स्वादुरि २७

तिशर्करां॥ह्निःसायुवासुवासाइतिवस्त्रेणसूत्रेणवा॥ॐनमः॥गमावेष्ट्य॥

पूर्णादर्वीतिपूर्णपात्रेनिधाय॥ततःप्रागुदग्वाचतुर्दिक्षुचतुरः॥ॐना

न्मध्येचैकं॥ॐनमःप्रत्येकंमंत्रावृत्त्यापदार्थानुसमयेनजपार्थेसंस्थाप्य

॥रुद्र॥ॐनमःसोवर्णप्रतिमायांत्र्यंबकंवसिष्ठोरुद्रोनुष्टुप्रुद्रावाहने

विनियोगः॥त्र्यंबकमितिरुद्रमावाह्यपूजयेत्॥ततःरुद्र॥ॐनमःस्पृष्टे

कल्विकुर्याज्जुषश्चेद्रुद्रैकादशिनींबह्वृचश्चेत्॥रुद्रसूक्तानिषट्

दोगश्चेद्रुद्रसामानिजपेत्॥रुद्रसाम्नामेकद्वित्र्यष्टैकादशावृत्तिः

शक्तितोज्ञेया॥कद्रुद्रायघोरःकण्वोरुद्रोगायत्री॥[illegible]॥इमारुद्राय

कुत्सोरुद्रस्त्वायानवज्रगत्यांत्येत्रिष्टुभौ॥आतेपितर्गृत्समदोरुद्र

त्रिष्टुप् जपे विनियोगः॥ सामानि ज्ञ आवोराज्ञानं वामदेवो रुद्रस्त्रि
ष्टुप्॥ नमुष्टुहि नो माब्रिष्ट्री रुद्रस्त्रिष्टुप्॥ भुवनस्य पितरम्मुञ्जिश्वा रुद्र
स्त्रिष्टुप्॥ जपे विनि०॥ ततोन्यस्त्वविकुञ्ज पार्थकं न पंचके शाक्रमेण ज
पेत्॥ तत्र पूर्वेश्वाङः शिशानइति त्रयोदशास्येंद्रो प्रतिरथस्त्रषिः॥ त्रिं
द्रो देवता॥ चतुर्थ्या बृहस्पतिस्त्रिष्टुप् जपे विनियोगः॥ दक्षिणे रुद्राप १८
श्चिमे रुद्रानुवाकं॥ उत्तरे रक्षोहणमिति पंचविंशर्चस्यांगिरसः पायु
रग्निस्त्रिष्टुप् जपे०॥ ततोमध्यमकंनेजपेत्॥ त्र्यंबकं वसिष्ठो रुद्रोनुष्टुप्॥

११ जपे०॥ अत्रैव घमानमपि सक्लज्जपेत्॥ एवं षडंकंनाशक्तौ रुद्रकं
नंचतुः प्रस्त्ववर्णचेति कंनद्वयं संख्याया॥ रुद्रैकादशिन्यादि रुद्र
कंनेजप्त्वा॥ प्रतिरथादीनि चत्वारि प्रस्त्ववर्णेषु त्र्यंबकं पावमानी श्च
मध्यमुरवेजपेत्॥ अथाचार्यो रुद्रकंनान्तेर्त्वियेरुद्रं डिंलेग्निप्रतिष्ठा
प्य॥ नद्दिशाद्यां नवग्रहस्थापनं तत्त्वाषंचादध्यात्॥ नद्यथा॥ सवितृह
यमादायास्यां सूर्यशाती देवतापरिग्रहार्थमन्वाधास्ये स्मिन्नन्वाहिते
स्माविन्यादिचतुर्थ्यामाज्येनेत्यंतका॥ नवग्रहानधिदेवताः प्रत्यधि

देवतालोकपालान्विनायकादीन्‌च प्रत्येकममुकसंख्यया समिच्चर्वा
ज्यैर्निर्दिशति ग्रहेभ्यमष्टोत्तरशतसंख्यया इंद्रमपश्च प्रत्येकमष्टावि
शतिसंख्ययाधिनाकपायससमिदाज्यचरुभिर्विश्वेदेवाद्यास्तु विंश
तिस्रद्देवताश्चाष्टाष्टसंख्यया पायसेन रक्षोहणं वलगणमुग्रेति पंचदश
भिः शरान्नेन सवितारं दुर्गां जातवेदाग्निं रुद्रं क्षत्रविकूरस्त्वतिदुर्गां १८
वास्तोष्पति॥ मग्निं इंद्रं त्राधिपतिं मित्रावरुणौ अग्निमेताश्चाष्टाष्टसं
ख्ययाक्षरशरान्नेन अग्नि यं हिरण्यवर्णामिति पंचदशार्भिः प्रत्युचम

ष्टसंख्यया समिदाज्यचरुभिः सोमं त्रयोदशवारं पायसेन रुद्रंच
तुर्गृहीतेनाज्येन अग्निं वायुं सूर्यं प्रजापतिं बृहस्पतिमिंद्रं विश्वा
न्देवान्महाव्याहृतिभिराज्येन शेषेण स्विष्टकृतमित्यादि सद्योय
द्यस्त्यं तमुक्तासमस्तव्याहृतिभिः समिद्वयमन्वावादध्यात्॥ आ
श्लेषाशांतौ उ सर्पप्रधानदेवतामधिदेवतां बृहस्पतिं प्रत्यधिदेव
तां पितॄन्नगाद्यदित्यंतद्देवताश्चेति विशेषः॥ ततः परिसमूह
नादि पूर्णपात्रनिधानांतं कृत्वाग्नेः प्रागुदग्वा रक्तैः अक्षतैर्वा तंडु

नेचतुर्विंशद्दलपद्मंलिखित्वा॥तत्रप्राग्वत्कुंभंसंस्थाप्य॥तस्मिन्नुपात्रेओष
धिरितिशतच्छिद्रानितदलानेविष्णुक्रांतासहदेवीतुलसीशतावरीभृं
गराजानिक्षिप्त्वा॥स्वर्णपात्रंनिधाय॥तत्रसौष्टदलंवासोवितत्यत
त्कर्णिकायांनिष्कतदर्द्धंतदर्द्धमितांनिर्ऋतिप्रतिमांअभ्युत्तारणपू
र्वकंपंचामृतस्नपितांमोषुणोघोरःकण्वोनिर्ऋतिर्गायत्री॥मोषुणइ २०
तिषष्ठ्यासंस्थाप्य॥संस्मरेन्निर्ऋतिंश्यामंखड्गमुद्गरवंनरवाहनं॥रक्षोधि
पंरक्तहस्तंदिव्याभरणभूषितं॥इतिध्यात्वा॥तद्दक्षिणतईशेवामधु

छंदाइंद्रोगायत्रीतींद्रंतदुत्तरतस्वर्गमेमेधातिथिरापोनुष्टुप्इत्यपां
सौवर्णप्रतिमेसंस्थाप्य॥पदार्थानुसमयेनस्वस्वमंत्रैःस्ताःपूजयेत्॥
तत्रवस्त्रयुग्मंरक्तचंदनलक्तपुष्पाणिमेषशृंगस्यधूपः॥आज्यस्य
दीपः॥पालिकोदनादिनैवेद्यं॥ब्राह्मणानांसुरास्थानेसैंधवमिश्रंदधी
रंमांसस्थानेलवणमिश्रंयुक्तंपायसं॥क्षत्रियादीनांतुसुरामेव॥त
तःचतुर्विंशद्दलेषुप्रागादितो॥विश्वेदेवाः।विष्णुः।वसवः।वरुणः।अजै
कपात्।अहिर्बुध्न्यः।पूषा।अश्विनौ।यमः।अग्निः।प्रजापतिः।सोमः।रुद्रः।

अदितिः। बृहस्पतिः। सर्पाः। पितरः। भगः। अर्यमा। सविता। त्वष्टा। वायुः।
इन्द्राग्नी। मित्रः। इत्येताश्च यथोक्तैर्नाममन्त्रैः क्रमेणावाह्य पूजये
त्॥ अश्लेषाशान्तौ तु सर्पप्रतिमां नमोऽस्तु सर्पेभ्य इत्यावाह्य॥ संपरिक्त
स्त्रिनेत्रश्च द्विभुजः पीनवक्षकः॥ फलकासिधरस्तीक्ष्णो दिव्याभरणभू
षितः॥ इति ध्यात्वा॥ तद्दक्षिणतो बृहस्पतिनेगृत्समदो बृहस्पतिस्त्रिष्टु २२
प्॥ इति बृहस्पतिं तदुत्तरत उदीरतामिति शंखः स्वधा त्रिष्टुप्॥ इति पितॄ
न्नावाह्य॥ चतुर्विंशतिदलेषु प्रागादितो भगाद्यदित्यन्तं तद्देवता
आवाह्य पूजयेत्॥ ततो ध्यानक्रमेण पायसचरुं हुत्वा सरान् अप
यित्वाज्यभागौ तं हुत्वा॥ यजमानेन सर्वदेवतोद्देशेन द्रव्ये त्यक्ते स
र्त्विग्ध्यानक्रमेण तत्तद्देवतानां तत्तन्मन्त्रैः कुर्वा॥ रक्षोहाद्या वक्ष्यमाण
ग्नेः कुर्यात्॥ त्वामग्न इति पञ्चदशर्चस्य वामदेवो रक्षोहा त्रिष्टुप्॥
हुतस्य होमे विनियोगः॥ एवं सर्वत्र॥ गायत्र्या विश्वामित्रः सविता गाय
त्री॥ जातवेदसे कश्यपो दुर्गा त्रिष्टुप्॥ त्र्यंबकं वसिष्ठो रुद्रोऽनुष्टुप्॥ सी
रा युञ्जन्तीति बुधस्त्वविकृस्तिर्गायत्री॥ तामग्निवर्णां सौभरिर्दुर्गा त्रिष्टु

प्॥ वास्तोष्पतेवसिष्ठोवास्तोष्पतिस्त्रिष्टुप्॥ अग्नेनयागस्त्योग्निस्त्रिष्टुप्॥
क्षेत्रस्यवामदेवः क्षेत्रपालोनुष्टुप्॥ इणानाञ्जमदग्निर्मित्रावरुणौ
गायत्री॥ अग्निंदूतंकाण्वोमेधातिथिरग्निर्गायत्री॥ हिरण्यवर्णामिति
पंचदशार्चस्यकर्दमानंदचिक्लीतेंदिरासुताऋषयः॥ श्रीर्देवताआ
द्यास्तिस्रोनुष्टुभः चतुर्थीप्रस्तारपंक्तिः पंचमीषष्ठ्यौ त्रिष्टुभौ॥ ततोष्टा २२
नुष्टुभोंत्याप्रस्तारपंक्तिः प्रत्यृचंसमिदाज्यचरुहोमेविनियोगः॥
त्वंनःसोमेतिप्रगाथः सोमस्त्रिष्टुप्पायसहोमेविनियोगः॥ यातेरु

द्रेतिकश्यपोरुद्रः स्वराडनुष्टुप्चतुर्थ्याहीनाज्यहोमेविनियोगः॥ सप्त
प्राकृतीनोविश्वामित्रादयोऋषयोग्न्यादयोदेवागायत्र्यादीनिछं
दांसिआज्यहोमेविनियोगः॥ एवंकृत्वास्विष्टकृदादिप्रायश्चित्तांतु
त्यंतंकृत्वा॥ लोकपालनवग्रहविनायकादिभ्योनिर्ऋतीशान्यो
रुद्रक्षेत्रपालयोश्चबलीदत्वापूर्णाहुतिंजुहुयात्॥ तत्रमंत्राः॥
समिद्धोग्निरित्येकादशार्चस्यवामदेवआपस्त्रिष्टुप्॥ अंत्यानग
तीप्रजापतेहिरण्यगर्भःप्रजापतिस्त्रिष्टुप्॥ पूर्णादर्विविश्वेदेवाः

शतंकऋषिरनुष्टुप्॥सप्ततेअग्नेसप्तवानग्निर्जगतीपूर्णाहुतिहोमेवि
नियोगः॥एवंसर्वत्र॥ततोहोमशेषंसमाप्य॥प्रधानकुंभेनदक्षिण
तःस्पृष्ट्वा॥शतवारंत्र्यंबकमंत्रंजप्त्वा॥तथैवसछिद्रकुंभेनचस्पृष्ट्वा
करीत्यारुद्रैकादशिन्यादिजप्त्वा॥गंधादिभिःकुंभद्वयगतनिर्ऋ
तिरुद्रावभ्यर्च्य॥सर्त्विगाचार्यःसर्वकुंभोदकैःभद्रासनोपविष्टंसा २३
पत्यकलत्रंयजमानमभिषिंचेत्तत्रमंत्राः॥अक्षीभ्यामितिषण्णां
कश्यपोयक्ष्मघ्नानुष्टुप्अभिषेकेविनियोगः॥एवमुत्तरत्र॥पव

स्वविश्वचर्षणइतित्रिंशर्चस्यशतंवैखानसाःपवमानसोमोगायत्री॥
आपोहिष्ठेतिनवर्चस्यांबरीषःसिंधुद्वीपआपोगायत्र्यंतेद्वेनुष्टुभौ
पंचमीवर्द्धमानासप्तमीप्रतिष्ठा॥यतइंद्रेतिद्वयोःसप्तर्षयोविश्वेदे
वाअनुष्टुप्॥सहस्राक्षेणेतित्र्यृचस्यप्राजापत्योयक्ष्मनाशनोयक्ष्म
हात्रिष्टुप्षड्योरंत्यानुष्टुप्॥देवस्यत्वेतित्रिनिर्यजुषयज्जाग्रते
तिषण्णांशिवसंकल्पमंत्राणांप्रजापतिर्मनस्त्रिष्टुप्॥योसौवज्रधरोदे
वोमहेंद्रोगजवाहनः॥स्वजन्मानशिशोदर्शमातापित्रोर्व्यपोहतु॥यो

सौशक्तिधरोदेवोकुनस्तुङ्गषवाहनः॥सप्तजिह्वश्चदेवोग्निर्मूलदोषं
व्यपोहतु॥योसौदंडधरोदेवोधर्मोमहिषवाहनः॥मूलजातशिशोर्दो
षंव्यपोहतुयमोमम॥योसौखड्गधरोदेवोनिर्ऋतीराक्षसाधिपः॥प्र
शमयतुमूलोत्थंदोषंगंडांतसंभवं॥योसौपाशधरोदेवोवरुणश्चज
लेश्वरः॥नक्रवाहःप्रचेतानोमूलोत्थाघंव्यपोहतु॥योसौदेवोजगत्प्रा २५
णोमारुतोमृगवाहनः॥प्रशमयतुमूलोत्थंदोषंबालस्यशांतिदः॥योसौ
निधिपतिर्देवःखड्गभृद्वाजिवाहनः॥मातापित्रोःशिशोश्चैवमूलदोषंव्य

पोहतु॥योसौपशुपतिर्देवःपिनाकीवृषवाहनः॥आश्लेषामूलगंडो
त्थदोषमाशुव्यपोहतु॥विघ्नेशःक्षेत्रपोदुर्गालोकपालानवग्रहाः॥स
र्वदोषप्रशमनंसर्वेकुर्वंतुशांतिदाः॥आश्लेषाशांतौतु॥आश्लेषार्
क्षजातस्यमातापित्रोर्धनस्यच॥भ्रातृज्ञातिकुलज्ञानांदोषंसर्वंव्यपो
हतु॥योसौवागीश्वरोनामअधिदेवोबृहस्पतिः॥मातापित्रोःशिशोश्चैव
गंडदोषंव्यपोहतु॥पितरःसर्वभूतानांरक्षंतुपितरःसदा॥सर्पनक्ष
त्रजातस्यविघ्नंचज्ञातिबांधवान्॥इतिविशेषः॥ततःतच्छंयोःशंयुर्वि

श्चदेवाःशांकरी॥ अभिषेकेविनतनोवस्त्रांतरितनिर्ऋतिरुद्रकुंभोद
केनस्नापितोयजमानोधृतवासाःसापत्यकलत्रःकांस्यपात्रस्थाज्येस्व
रूपमित्यवेक्ष्यविप्रायदत्वा॥ आचार्यादीनभ्यर्च्याचार्यायगांब्राह्म
णेवृषंसदस्यायाश्वंरुद्रजापिनेऽश्वंवृषंधेन्वाद्यभावेतन्मूल्यंवा
दत्वा॥ स्वशक्त्यास्त्रविप्रान्भोज्ययसींचदत्वोत्तरपूजांकृत्वा॥ योत्विति २५
६ ति विसृज्याचार्यायनिर्ऋतिप्रतिमांकुंभादिरुद्रजापिनेरुद्रप्रतिमा
कुंभादिसंकल्पपूर्वकंदत्वाग्निमभ्यर्च्य॥ गच्छगच्छेतिविसृज्य॥ शतं

तदर्द्धंदशवाब्राह्मणान्भोजयित्वा॥ शांत्याशीर्वाचयित्वा॥ यस्यस्मृत्येत्य
क्त्वासबन्धोभुंजीत॥ ॥इतिभट्टनीलकंठकृतेभास्करेशांतिमयूखे
मूलाश्लेषाशांतिप्रयोगः॥ ॥अथवैधृतिव्यतीपातसंक्रांतिशांतिः॥
शौनकः॥ ॥कुमारजन्मकालेतुव्यतीपातश्चवैधृतिः॥ संक्रमश्चरवे
स्तत्रजातोदारिद्र्यकारकः॥ दरिद्राणांमहादुःखंव्याधिपीडासमु
द्भवं॥ अश्रियोमृत्युमाप्नोतिनात्रकार्यविचारणा॥ स्त्रीणांचशोक
दुःखंचसर्वनाशकरोभवेत्॥ शांतिर्वापुष्कलाकार्यानस्यदोषोनव

श्चन॥गोमुखप्रसवंकुर्याच्छांतिंकुर्यात्प्रयत्नतः॥उपानिषेकदानेच
होमादपिविशेषतः॥नवग्रहमखंकुर्यात्तस्यदोषोपशांतये॥अथ
मेगोमुखाज्जन्मततःशांतिंसमाचरेत्॥गृहस्यपूर्वदिग्भागेगोमयेना
नुलिप्यच॥अलंकृतेसुदेशेतुव्रीहिराशिंप्रकल्पयेत्॥पंचद्रोणमितं
धान्यंतदर्द्धंतंडुलेनच॥तदर्द्धंतुतिलैःकुर्यादन्योन्योपरिकल्पयेत्॥ २६
द्रव्यत्रितयराशौतुअष्टपत्रंलिखेद्बुधः॥पुण्याहंवाचयित्वातुआ
चार्यंवृणुयात्पुरा॥आचारवंतंधर्मज्ञंकुलीनंचकुटुंबिनं॥मंत्रत

त्त्वार्थतत्त्वज्ञंशांतिकर्मणिकोविदं॥पंचांगभूषणंदद्यात्पट्टवस्त्रांगु
लीयकं॥रात्रौप्रतिष्ठितंकुंभंअव्रणंसुमनोहरं॥तीर्थोदकेनसंपू
र्यमृदौषधिसपल्लवं॥सगंधगंधरत्नंचवस्त्रयुग्मेनवेष्टयेत्॥तस्योप
रिन्यसेत्पात्रंस्वर्णमव्रणसंयुतं॥प्रतिमांस्थापयेद्धीमान्साधिप्रत्या
धिदेवता॥चंद्रादित्यौततोपार्श्वेमध्येवैप्रतिमर्चयेत्॥एवमेवव्यतीपा
तेशांतौसंक्रमणस्यतु॥नानोरुत्तरतोरुद्रमग्निंदक्षिणतोर्चयेत्॥नि
ष्कमात्रेणवार्द्धेनपादेनापिस्वशक्तितः॥प्रतिमांकारयेद्धीमान्तत्तद्ध्व

ह्मणाज्ञ्हिता॥ प्रतिमाप्रजनार्थायवस्त्रयुग्मंनिवेदयेत्॥ अधिदेवान्
वेश्वर्यः चंद्रः प्रत्यधिदेवता॥ ततोघ्राकृतिपूर्वेणतन्मंत्रेणप्रजयेत्॥ त्रै
यंबकेनमंत्रेणप्रधानप्रतिमांयजेत्॥ नस्त्रर्यइतिमंत्रेणसूर्यप्रजांसमा
चरेत्॥ आप्यायस्वेतिमंत्रेणसोमप्रजांसमाचरेत्॥ उपचारैःषोडशा
निर्यद्वापंचोपचारकैः॥ अर्चिवागंधपुष्पाद्यैःफलैर्नैवेद्यमर्पयेत्॥ ष्ट्र २७
त्फङ्गयेनमंत्रेणप्रधानप्रतिमांस्पृशेत्॥ अष्टोत्तरसहस्रंवा अष्टोत्त
रशतंतथा॥ अष्टाविंशतिवाचाथप्रजायांचस्वशक्तितः॥ सर्वसौरभ

जुधाथसोमायसोममंत्रतः॥ आनोनद्वेतिसूक्तंचनद्यास्त्रग्रेसूक्त
कं॥ जपेत्तुपौरुषंसूक्तंत्रैयंबकमतःपरं॥ कुंडंस्पृष्ट्वाचतुर्दिक्षुजपं
कुर्युस्तथर्त्विजः॥ कुंडस्यपश्चिमेदेशेस्थंडिलेग्निंप्रकल्पयेत्॥ स्वगृ
ह्योक्तविधानेनकारयेत्संस्कृतानलं॥ त्रैयंबकेनमंत्रेणसमिदाज्यंच
रुंहुनेत्॥ अष्टोत्तरसहस्रंवा अष्टोत्तरशतंतथा॥ अष्टाविंशतिवाकु
र्यात्स्वस्यशक्त्यनुसारतः॥ सत्यंफङ्गयेनमंत्रेणतिलहोमंसमाचरेत्॥ त
तःस्विष्टकृतंकृत्वाअभिषेकंचकारयेत्॥ समुद्रज्येष्ठासूक्तेन आपो

हिष्टाहृचेनच॥ अङ्गीत्यामितिसूक्तेनपावमानीभिरेवच॥ त्रैयंबकेन
नक्षत्र्यमाप्यायस्वेतिमंत्रतः॥ सुरास्त्वाइतिमंत्रेण अभिषेकंचकारयेत्॥
सुरास्त्वामभिषिंचकौत्विको अभिषेकमंत्रसमुदायोयुतहोमविधानदृष्ट
व्यः॥ अभिषेकाप्लुतंवस्त्रमाचार्यायनिवेदयेत्॥ श्वेतवस्त्रधरोभूत्वाभू
षणाद्यैरलंकृतः॥ यजमानस्त्रियायुक्तः आज्यावेक्षणमाचरेत्॥ आ २८
चार्यंपूजयेत्पश्चाद्वस्त्रहेमांगुलीयकैः॥ गोदानंवस्त्रदानंचस्वर्णदानं
विशेषतः॥ तद्दोषशमनार्थाय आचार्यायप्रदापयेत्॥ प्रच्छादनपटंद

द्यादतःशांतिर्भवेदिति॥ जापकेभ्योब्राह्मणेभ्योदक्षिणांप्रतिदापयेत्॥
दीनांधकृपणेभ्यश्चप्रदद्याद्भूरिदक्षिणां॥ ब्राह्मणान्शतसंख्याकान्
मिष्टान्नैर्भोजयेद्व्रतान्॥ बंधुभिःसहभुंजीतयथाविभवसारतः॥ एवं
यःकुरुतेमर्त्योनैवदुःखमवाप्नुयात्॥ आयुरारोग्यमैश्वर्यमातापित्रोः
शिशोरपि॥ ॥अथप्रयोगः॥ ॥कर्तागोमुखप्रसवंकृत्वामासपक्षाद्यु
ल्लिख्यास्यशिशोर्वैधृतौव्यतीपातेसंक्रांत्यांचोत्पत्त्यासूचितस्यानिष्ट
स्यनिरासार्थंशांतिंकरिष्यइतिसंकल्प्य॥ गणेशपूजास्वस्तिवाचनमा

रपूजावद्भिः आद्याचार्यादिवरणानिकुर्यात्॥ अथाचार्यःसर्षपवि
करणादिकृत्वा॥ प्राच्यांगोमयोपलिप्तभुवि पंचद्रोणंतदर्द्धंतदर्द्धमि
तव्रीहितंडुलतिलानन्योन्योपरिराशित्रयंकृत्य॥ तत्राष्टदलंविरच्य
तत्कर्णिकायांकुंभंस्थाप्य॥ तीर्थोदकेनापूर्य॥ तत्रसप्तमृत्पंचपल्ल
वरत्नपंचगव्याष्टगंधसर्वौषधीःक्षिप्त्वा॥ वस्त्रयुग्मेनावेष्ट्य॥ पूर्णपा २९
त्रंनिधाय॥ तत्रवैधृतव्यतीपातयोःशांतौमध्येत्र्यंबकमितिरुद्रंत
द्दक्षिणेतस्सूर्यंशतिसूर्यमुत्तरतआप्यायस्वेतिसोमंसंक्रांतिशांतौ

तुमध्येसूर्यंतद्दक्षिणतोग्निंदूतमित्यग्निंउत्तरतोरुद्रंतत्प्रतिमास्वा
वाह्य॥ षोडशभिःपंचभिर्वोपचारैःसंपूज्य॥ रुद्रसूर्यसोमप्रतिमा
स्पृष्ट्वाष्टसहस्राष्टशताष्टाविंशत्यन्यतरसंख्ययामृत्युंजयमंत्रं
सर्वसौरमंत्रान् आप्यायस्वेतिचक्रमाज्जपेतु॥ संक्रांतिशांतौतुपू
र्वसौरजपस्ततोमृत्युंजयजपः॥ ततऋत्विजःप्रागादिदिक्क्रमेण
तोनशान्नशाग्नेसहस्रशीर्षेतिसूक्तानित्र्यंबकमंत्रंचजपेयुः॥ आ ३८
चार्यस्तुकुंभान्पश्चिमेग्निंप्रतिष्ठाप्य॥ ग्रहावाहनादिकृत्वाज्ञा

दध्यात्॥ तत्र च लक्षणी आज्येनेत्यैते रुद्रसूर्यसोमान्समिद्वर्जिता
स्तन्मंत्रै मृत्युंजयमंत्रेण च तिलाकृति निरष्टसहस्राष्टशताष्टविं
शत्यन्यतमसंख्यया शेषेण स्विष्टकृतमित्यादि संक्रांतिशांतौ उक्त
यग्निरुद्रानिति विशेषः॥ ततः आज्यभागांतेवाधानक्रमेण कुला॥ बलि
दानांते कलशोदकैः समुद्रज्येष्ठा इति सूक्तेनापो हिष्ठेति तृचेनाद्भी नै ३०
न्यामिति सूक्तेन पावमानीभिः शांता नाधिप्रत्यधिदेवतामंत्रैः सुरास्त्वे
त्यादि पौराणैश्चाभिषिक्तो यजमानोभिषेकवस्त्रमाचार्याय निवे

द्याज्यमवेक्ष्य। पूर्णाहुतिं कृत्वा। आचार्याय धेनुं वस्त्रयुग्मांगुलीयका
दि ऋत्विग्भ्यश्च दक्षिणां दत्वा। अन्येभ्यश्च भूरिदक्षिणां दत्वा॥ शतं श
क्त्या वा ब्राह्मणान्भोजयित्वा॥ बंधुभिः सह भुंजीतेति वैधृतव्यतीपात
संक्रांतिशांतयः॥ ॥अथैकजन्मनक्षत्रशांतिः॥ ॥गर्गः॥ ॥एकस्मि
न्नेव नक्षत्रे भ्रात्रोर्वा पितृपुत्रयोः॥ प्रसूतिश्चेत्तयोर्मृत्युर्भवेदेकस्य
निश्चयः॥ तद्दोषनाशाय तदा प्रशस्तां शांतिं च कुर्यादभिषेचनं च॥
संपूज्य नक्षत्रप्रतिमां नदद्याद्दानं च कुर्याद्विभवानुरूपं॥ तत्र शांतिं प्र

वक्ष्यामि सर्वाचार्यमतेन तु ॥ अनर्हेऽप्यनवारे च चंद्रताराबलान्विते ॥
रिक्ताविष्टीविवर्ज्येऽप्यारभेद्दक्षिणे सुधीः ॥ आचार्यं वरयेत्पूर्वं च
तुरस्त्वृत्विजोत्तमान् ॥ पुण्याहं वाचयित्वा तु शांतिकर्म समाचरेत् ॥ अ
ग्नेरीशानदिग्भागे नक्षत्रप्रतिमां ततः ॥ तन्नक्षत्रमार्गेण अर्चयेत्क
लशोपरि ॥ रक्तवस्त्रेण संछाद्य वस्त्रयुग्मेन वेष्टयेत् ॥ स्वशाखोक्ते ३१
नमार्गेण कुर्यादग्निमुखं ततः ॥ अनेनैव तु मंत्रेण कुर्यादष्टोत्तरं शा
तं ॥ प्रत्येकं समिदन्नाज्यैः प्रायश्चित्तं तमेव च ॥ अभिषेकं ततः कु

र्यादाचार्यः पितृपुत्रयोः ॥ वस्त्रालंकारगोदानैराचार्यं पूजयेत्पुनः ॥
ऋत्विग्भ्यो दक्षिणां दद्यान्माषत्रयसुवर्णकं ॥ देवताप्रतिमादानं धान्य
वस्त्रादिभिः सह ॥ यानशय्यासनादीनि दद्यात्तद्दोषशांतये ॥ भोजये
द्ब्राह्मणान्सर्वान्वित्तशाठ्यविवर्जितः ॥ ॥ अथ प्रयोगः ॥ ॥ कर्ता मा
सपक्षाद्युल्लिख्यास्य शिशोः पित्राद्येकर्क्षोत्पत्तिसूचितानिष्टशांत्य
र्थमेकनक्षत्रशांतिं करिष्ये इति संकल्प्य ॥ गणेशपूजनस्वस्तिवा
चनाभ्युदयिकाचार्यर्त्विग्वरणानि कुर्यात् ॥ अथाचार्योऽग्नेरीशान्यां

कंतेसंस्थाप्य॥तस्मिन्पूर्णपात्रोपरितत्तन्नक्षत्रोक्तमंत्रेणप्रतिमायां
तत्तन्नक्षत्रदेवतामावाह्य॥रक्तवस्त्रयुग्मेनाछाद्य॥संपूज्याग्निंप्र
तिष्ठाप्यान्वाधायाज्यभागांतंकृत्वा॥नक्षत्रमंत्रेणसमिच्चर्वा
ज्यानिप्रत्येकमष्टोत्तरशतंकृत्वा॥होमशेषंसमाप्यशिष्टेनतत्पुत्रा
दीनभिषिंचेत्॥ततःकर्त्तोत्तरपूजांकृत्वाविसृज्य॥प्रतिमादि ३२
कंगवादिचाचार्यायदत्वा॥ऋत्विग्भ्यश्चप्रत्येकंसौवर्णमाषत्र
यात्मिकांयथाशक्तिवादक्षिणांदत्वा॥यथाविभवंपानशय्या

सनादीनिचदत्वा॥ब्राह्मणान्भोजयित्वा॥स्वयंभुंजीतेतिएक
नक्षत्रशांतिप्रयोगः॥ ॥इतिएकनक्षत्रशांतिप्रयोगःसमाप्तः॥
॥ ॥लेखकपाठकयोःशुभंभवतु॥ ॥यादृशंपुस्तकमितिन्गा
यात्रमेदोषः॥ ॥कल्याणमस्तु॥ ॥श्रीरस्तु॥ ॥श्रीः॥ ॥श्रीः॥
अथदिनक्षयशांतिः॥ ॥गर्गः॥दिनक्षयेव्यतीपातेव्याघातेविष्टिवैधृतौ ३३
॥शूलेगंडेतिगंडेचपरिघेयमघंटके॥कालदंडेमृत्युयोगेदुष्टयोगसु
दारुणे॥तस्मिन्गंडदिनेप्राप्तेप्रसूतिर्यदिजायते॥अतिदोषक

रीप्रोक्तातत्रदोषयुतेसति ॥ विचार्यतत्रदैवज्ञैःशांतिंकृत्वायथाविधि
॥ यजमानोदेवतानांग्रहाणांचैवपूजनं ॥ दीपंशिवालयेभक्त्या
घृतेनपरिदीपयेत् ॥ अभिषेकंशंकरस्यच वस्त्रस्यप्रदक्षिणा ॥
आयुर्वृद्धिकरंज्ञायंसर्वानिष्टविनाशनं ॥ गुरुदैवतविप्राणांपू
जनंगोत्रवर्द्धनं ॥ पुष्ट्यायुस्कष्टिशात्यर्थंमभीष्टफलसिद्धये ॥ सर्वा ३३
निष्टहरार्थायचइयज्ञंसमाचरेत् ॥ शिवायविधिवद्भक्त्यादीप
दानंकरोतियः ॥ अखंडंगोघृतेनैवसर्वमृत्युंजयोनरः ॥ विष्णुप्र

त्रिमहापुण्यमवश्यंश्रीकरंसदा ॥ प्रदक्षिणांनरोभक्त्याकृत्वामृत्यु
जयेन्नरः ॥ सर्वसंपत्समृद्ध्यर्थंनित्यंकल्याणवृद्धये ॥ अभीष्टफलसि
द्ध्यर्थंकुर्याद्ब्राह्मणभोजनं ॥ अभिषेकंशिवेशांतिंकृत्वाभक्त्यान
रोनमः ॥ अकालमृत्युनिर्जित्यदीर्घायुर्जायतेनरः ॥ गाणपत्यंपु ३४
रुषसूक्तंसौरंमृत्युंजयेध्रुवं ॥ शांतिमाद्यंरुद्रजाप्यंकृत्वामृत्युं
जयोभवेत् ॥ मूलेवासर्वगंडेवाकुर्यादेतानियत्नतः ॥ आयुर्वृद्धि
करार्थायगंडदोषप्रशांतये ॥ ॥ इतिगंडजननशांतिः ॥ ॥ ॥

अथत्रिकशांतिः॥ ॥शांतिसर्वस्वे॥ ॥सुतत्रयेसुताचेत्स्यात्त्रयेवा
सुतोयदि॥मातापित्रोःकुलस्यापितदानिष्टंमहद्भवेत्॥ज्येष्ठनाशो
धनेहानिर्दुःखंवासुमहद्भवेत्॥तत्रशांतिंप्रकुर्वीतवित्तशाठ्यविव
र्जितः॥जातस्यैकादशाहेवाद्वादशाहेशुभेदिने॥आचार्यमृत्विजौ
वृत्वाग्रहयज्ञपुरःसरं॥सहवाग्रहयज्ञस्यास्वस्यवित्तानुसारतः॥ ३५
ब्रह्मविष्णुमहेशेंद्रःप्रतिमाःस्वर्णतःकृताः॥पूजयेद्धान्यराशिस्थ
कलशोपरिशोभिताः॥पंचमेकलशेरुद्रंपूजयेद्रुद्रसंख्यया॥रुद्र

सूक्तानिचत्वारिशांतिसूक्तानिसर्वशः॥द्विजएकोजपेद्धोमकाले
शुचिःसमाहितः॥आचार्योग्निंकुर्यात्तत्रसमिदाज्यतिलांश्चरुं॥
अष्टोत्तरसहस्रंवाशतंवाविंशतिंतुवा॥देवताभ्यश्चतुर्वक्त्रादिभ्यो
ग्रहपुरःसरं॥ब्रह्मादिमंत्रैरिंद्रस्ययतइंद्रभयामहे॥ततःस्विष्टकृ
तंकृत्वाबलिंपूर्णाहुतिंततः॥अभिषेकंकुटुंबस्यकृत्वाचार्यंप्रपू
जयेत्॥हिरण्यंधेनुरेकाचऋत्विग्भ्योदक्षिणांतथा॥प्रतिमागुरवेदे
याउपस्करसमन्विताः॥कांस्यास्यवीक्षणंदत्वाशांतिपाठंचका

रयेत्॥ब्राह्मणान्भोजयेच्छक्त्यादीनानाथांश्चतर्पयेत्॥एवंशांतिवि
धानेनसर्वारिष्टंबिविलीयते॥ ॥इतित्रिकशांतिः॥ ॥छ॥ श्रीः॥ ॥